**दुरध्व** पु० दुष्टोऽध्वा प्रा०स०अच् समा०। दुष्टवर्त्मनि अमरः।

**दुरन्त** त्रि० दुष्टोऽन्तोऽवसानं यस्य प्रा०ब०। १मृगयाद्यूतपानादिषु व्यसनेषु शब्दार्थचि०। तानि हि प्रथमं सुखयित्वा अन्ते दुःखाकुर्वन्ति। "व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्" मनुः। दुर्ज्ञेयोऽन्तः परिच्छेदो यस्य। २दुर्ज्ञेये ३गभीरे ४दुरतिक्रमणीये च "न्दलयति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते" गीतगो०। कप्। दुरन्तक असह्यमर्य्यादे ५शिवे पु० "दुर्विज्ञेयो महादेवो दुराधारो दुरन्तकः" भा० अनु०४१अ०।

**दुरन्वय** त्रि०दुःखेनान्वीयतेऽसौ दुर्+अनु–इ–कर्मणि खल्। दुःखेनानुगमनीये "दुरन्वयं दुष्प्रधर्षं दुरापं दुरतिक्रमम्। सर्वं वै तपसास्येति" भा०अनु० १२२अ०

**दुरभिग्रह** पु०दुःखेनाभिमुख्येन गृह्यतेऽसौ दुर्+अभि+ग्रह+खल्। १अपामार्गे २दुःखेन ग्राह्ये त्रि०। ३दुरालभायां ४कपिकच्छ्वाञ्च स्त्री राजनि०।

**दुरवग्रह** त्रि० दुःखेनावगृह्यते निगृह्यतेऽसौ दुर्+अव+ग्रह–कर्मणि खल्। कष्टेणानिग्राह्ये "वंशागतो रिपुर्यस्तु विचलेत् दुरवग्रहः" कामन्दकी० [स्थायाम्।

**दुरवस्था** स्त्री दुष्टा अवस्था प्रा०स०। दारिद्र्यादौ दुष्टाव-

**दुरस्य** दुष्ट+क्यच् "दुरस्युर्द्रविणस्युर्वृषण्यति" पा० वेदे नि०। दुष्टीभवने पर०अक० सेट्। दुरस्यति अदुरस्यीत्। "अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति" अथ०१।२६।२ लोके तु दुष्टीयति इत्येव। [उणादिको०।

**दुराक** पु० दुर्+अक+संज्ञायां कर्त्तरि घञ्। म्लेच्छदेशभेदे

**दुराचर** त्रि०दुःखेन आचर्य्यते दुर्+आ+चर–कर्मणि खल्। १कष्टेणाचरणीये "सोऽयं चतुर्णामेतेषामाश्रमाणां दुराचरः" भा०शा०६५६श्लो०। आर्षत्वात् कर्त्तरि षष्ठी। दुष्टमाचरति अच्। २दुष्टाचारयुक्ते त्रि० "समीरणः श्रोत्रगतोऽन्यथाचरः। समन्ततः शूलमतीव कर्णयोः। करोति दोषैश्च यथा स्वमाश्रितः स कर्णशूलो कथितो दुराचरः" सुश्रु०।

**दुराचार** पु० दुष्ट आचारः प्रा०स०। दुष्टे आचारे "प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः। दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः" अध्यात्मरामा०। "धार्ष्ट्याभावो-व्रीडा वदनानमनादिकृत् दुराचारात्" सा०द०। दुष्ट आचारो यस्य प्रा०ब०। २दुष्टाचारयुक्ते त्रि० "इमानि दुराचारा घोरदृष्टाशयक्रियाः" भट्टिः "दुराचारो हि पुरुषो लोके भवति निन्दितः" मनुः।

**दुराढ्यङ्कर** त्रि० दुःखेन आढ्यं क्रियते "कर्तृकर्मणोश्च भूकृञोः" पा० कर्तृकर्मणोरीषदादिषु च उपपदेषु भूकृञोः खल् स्यात् यथासङ्ख्यं नेष्यते कर्तृकर्मणी धातोरव्यवधानेन प्रयोक्तव्ये ईषदादयस्तु(ईष दुः सु)ततः प्राक्। "कर्तृकर्मणोश्च भूकृञोरिति वाच्यम्" वार्त्ति० सि०कौ०। कर्मणि उपपदे खल् मुम्। दुःखेन अनाढ्य आढ्यं करणीये

**दुराढ्यम्भव** न० दुःखेन अनाढ्येनाढ्येन भूयते दुर्+च्व्यर्थे आढ्ये कर्त्तरि उपपदे भावे खल् मुम्। दुःखेन अनाढ्यस्याढ्यभवने।

**दुरात्मन्** त्रि० दुष्ट आत्मा अन्तःकरणं यस्य। दुष्टान्तःकरणे "यस्तु धर्मेण कार्य्याणि मोहात् कुर्य्यान्नराधिपः। अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः"। "यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत्। तस्य तत् वितथं कुर्य्यात् कन्यादातुर्दुरात्मनः" मनुः।

**दुराधन** पु० धृतराष्ट्रपुत्रभेदे। "अपराजितः पण्डितको विशालाक्षो दुराधनः" भा०आ० ६७अ० धृतराष्ट्रसुतोक्तौ

**दुराधर** पु० धृतराष्ट्रपुत्रभेदे। अपराजितः कुण्डशायी विशालाक्षो दुराधरः" भा०आ०११७अ० तत्पुत्रोक्तौ।

**दुराधर्ष** पु० दुष्टान् राक्षसान् आधर्षति दुर्+आ+धृष अच्। १श्वेतसर्षपे तत्क्षेपणे हि वेतालादीनामपसर्पणं स्मृतौ दर्शितम्। दुःखेन ईषदपि धर्षयितुमशक्यम् दुर्+आ+धृष–कर्मणि खल्। २धर्षयितुमशक्ये त्रि०। "जगन्नाथो दुराधर्षो गङ्गां भागीरथीं प्रति" भा०अनु० ५८अ० "स प्रभावात् दुराधर्षो महाबलपराक्रमः" भा०व० २०२अ०। ३कुटुम्बिनीवृक्षे स्त्री राजनि०।

**दुराधार** पु० दुःखेनाधार्य्यते दुर्+आ–धारि–कर्मणि खल्। दुःखेन १आधारणीये २चिन्तनीये त्रि० ३महादेवे पु०। दुरन्तशब्दे दृश्यम्।

**दुरानम** त्रि० दुःखेनानम्यते दुर्+आ+नम–णिच्–कर्मणि खल्। दुःखेन आनमनीये। "स विचिन्त्य च धनुर्दुरानमम्" रघुः।

**दुराप** त्रि० दुःखेनाप्यते दुर्+आप–खल्। १दुष्प्राप्ये। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" रघुः "अस्त्रं हरादाप्तवता दुरापम्" रघुः सम्बन्धविवक्षया कर्त्तरि षष्ठी। भावे खल्। २दुष्प्राप्तौ न०।

**दुरारिहा** पु० दुष्टमियर्त्ति दुर्+ऋ–णिनि दुरारी दुर्गामी असुरः तं हन्ति हन्–क्विप्। विष्णौ "दुरावासो दुरारिहा" विष्णुसं० भाष्ये इत्थैव व्युत्पत्तिरुक्ता।